# पाठ-१०
# पतन्ति परपीडकाः

**सारान्शः**
कंसः विविधैः षड्यन्त्रैः कृष्णं बलरामं च घातयितुमिच्छति । कृष्णः बलरामः च मथुरानगरं प्रविशतः । मन्त्रिणा पीडितः मदोन्मत्तः उत्पलापीडनामकः हस्ती अपि हतः । राजद्वारे स्थितायाः मदनिका नाम कुब्जायाः कुब्जत्वं दूरीकृतम् ततश्च धनुःशालां प्राप्य धनुर्भङ्गः कृतः। कंसः अतीव उद्विग्नः सन् चाणूर-मुष्टिकौ मल्लौ आह्वयति येन तौ तु युद्ध्वा कृष्णबलरामौ हन्येताम् एतैः कृत्यैः कृष्णस्य अद्भुतं पराक्रमकौशलं सिद्ध्यति ।कृष्णस्य अद्भुतकृत्यैः भीतः राजा कंसः विशिष्टमल्लौ चाणूरमुष्टिकौ प्रेरयति येन तौ मल्लयुद्धे कृष्णबलरामौ हत्वा तस्य ऋणमुक्तौ भवेताम् । ततः चाणूर-कृष्णयोः, मुष्टिक- बलरामयोः च परस्परं घोरं मल्लयुद्धं भवति। सर्वे पश्यन्ति।युद्धे कृष्णः चाणूरं बलरामः च मुष्टिकं हन्ति । ततः परं कृष्णः प्रासादम् आरुह्य मल्लयुद्धं पश्यन्तं दुरात्मानं कंसं, शिरसि शिखां गृहीत्वा, तं भूमौ पातयति। तेन सः रक्तमुखः भग्नाङ्गशरीरः पञ्चतत्वं गतः । ततः तत्र तयोः पिता वसुदेवः आगत्य स्वपुत्रौ कृष्णं बलरामं च स्नेहं कृत्वा आशीर्वादं यच्छति । सः अद्य "सत्पुत्रजन्मनः फलं प्राप्तम्"   इति सहर्षम् अनुभवति ।

**मुख्य बिन्दवः**
महाकविः भासः कालिदासात् अपि पूर्ववर्ती कविः अस्ति। अस्य कालः ईसातः पूर्वं पंचमी षष्ठी वा शताब्दी इति डॉ. गणपतिः घोषयति । महाकवेः भासस्य त्रयोदश नाटकानि प्रसिद्धानि । सर्वप्रथमं टी. गणपतिः शास्त्री एव एतेषां पाण्डुलिपिं लब्धवान्। एतानि नाटकानि सन्ति ।
1. स्वप्नवासवदत्तम् 2.प्रतिज्ञायौगन्धरायणम् 3. अविमारकम् 4. चारुदत्तम् 5. प्रतिमा 6. अभिषेकम् 7. पंचरात्रम् 8. दूतवाक्यम् 9. मध्यमव्यायोगः 10. दूतघटोत्कचम् 11. कर्णभारम् 12 ऊरुभङ्गम् 13. बालचरितम् ।

**अवगच्छामः**
**राजा**
प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।
नात्मप्रियं प्रियं राज्ञः प्रजानां तु प्रियं प्रियम्" ।
(कौटिल्यः)

नृपस्य परमो धर्मः प्रजानां परिपालनम् ।
दुष्टनिग्रहणं नित्यं न नीत्यान्तौ विना युभे ।।
(शुक्रनीतिः)

रंजिताश्च प्रजाः सर्वास्तेन राजेति शब्धते । (महाभारते शान्तिपर्व)

मोहाद्राजा स्वराष्ट्रं य कर्षयत्यनवेक्षया।
सोऽचिराद् भ्रश्यते राजा जीविताच्च सबान्धवः ।।
(मनुस्मृतिः)

आपत्यात्मनि प्रायो दोषोऽन्यस्य चिकीर्षतः ।
(कथासरित्सागरम्)

विद्या विवादाय धनं मदाय,
शक्तिः परेषां परिपीडनाय।
खलस्य साधोः विपरीतमेतत्,
ज्ञानाय दानाय च रक्षणाय ।।

अष्टादश पुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम् ।।

**आवश्यकोऽयं ज्ञानम्**
'बालचरितम्' पंचाङ्कमितं सुन्दरं नाटकम् । प्रस्तुतः पाठः अस्मादेव नाट्यग्रन्थात् उद्धृतः। अस्य कथानकः महाभारतम् आधृतः वर्तते । अस्मिन् नाटके श्रीकृष्णस्य जन्मनः आरभ्य कंसवधपर्यन्तम् कथावस्तु सरसं सुललितं च सुबद्धम् अस्ति ।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**
**शतृ-शानचौ**
शतृ (अत्) शानच् (आन/मान) वर्तमानकालिक - कृत्प्रत्ययौ । शतृ शानच् प्रत्ययान्तशब्दौ विशेषणरूपे भवतः । अतः एतयोः त्रिषु लिङ्गेषु रूपाणि भवन्ति ।

**अनुस्वारः**- यदा "पदस्य अन्ते 'म्' भवेत् पश्चात् च व्यंजनवर्णः भवेत् तदा 'म्' स्थानेऽनुस्वारः भवति । यथा- ग्रामम् प्रति गच्छ = ग्रामं प्रति गच्छ।

**परसवर्णः**- 'अनुस्वार' स्थाने परसवर्णः भवति । यदि अनुस्वारात् (ं) परं व्यंजनवर्णः भवेत् तदा अनुस्वारः वर्गस्य पंचमाक्षरे परिवर्तते ।यथा- सम् + गमः = सङ्गमः।

**अव्ययीभावः**-पूर्वपदार्थप्रधानः अव्ययीभावः । अव्ययपदेन सह समासः भवति ।

**द्वन्द्वः**- 'चार्थे द्वन्द्वः' । 'च' अर्थे वर्तमानयोः द्वयोः शब्दयोः तदधिकशब्दानां वा द्वन्द्वः समासः भवति । द्वन्द्वः मुख्यतः द्विधा- इतरेतरः समाहारश्च ।

**इतरेतरः**- द्वयोः पदयोः भवति, बहूनां पदानाम् अपि भवति। पदयोः पदानाम् वा एकस्मिन् क्रियापदे अन्वयः ।यथा- हरिः च हरः च=हरिहरौ ।

**समाहारद्वन्द्वः**- समाहारः = समूहः । विग्रहे 'समाहार' शब्दस्य प्रयोगः भवति ।यथा- पाणी च पादौ च एतेषां समाहारः = पाणिपादम्।

**द्विगुः**- सङ्ख्यावाचकपदस्य अन्यपदेन सह समासः भवति विग्रहे 'समाहार' शब्दस्य प्रयोगः क्रियते। समासान्ते स्त्रीलिङ्गं नपुंसकलिङ्गं वा भवति ।यथा- त्रयाणाम् भवनानाम् समाहारः = त्रिभुवनम्।

**शब्दार्थाः**
**घातयामि** = मरवा देता हूँ
**प्रविशन्** = प्रवेश करते हुए
**आयान्तं** = आते हुए
**अनुलिप्य** = चुपड़कर
**वार्यमाणः** = रोके जाते हुए
**विघाट्यतां** =खोल दो
**अद्यप्रभृति** =आज से
**ललित** = सुन्दर

**योग्यतां वर्धयत**
कृष्णस्य बालचरितविषये तु भवन्तः पठितवन्तः श्रुतवन्तः च । लोकप्रियं सुखदम् अद्भुतं च कृष्णस्य बालचरितम् इति वयं जानीमः एव ।कृष्णः वसुदेवस्य पुत्रः आसीत् । देवकी च तस्य जननी अभवत् । मथुराधिपः कंसः अतीव प्रजापीडकः आसीत्। कृष्णः बाल्यकाले एव तं दुष्टं कंसं हतवान्।

**पाठ संप्रेष्यः**
**1.** दामोदरस्य बालचरितम् अत्यदभुतम् अस्ति ।
**2.**उग्रसेनस्य पुत्रः कंसः अतीव दुष्टः आसीत् ।
**3.**मधुराधिपः कंसः दामोदरं मारयितुं नैकान् यत्नान् अकरोत् ।
**4.**दामोदरः गजेन्द्रं हत्वा मदनिकां कुब्जिकां कुब्जरहिताम् अकरोत्।
**5.**दामोदरः धनुःशालायाम् धनुः द्विखण्डं कृत्वा चाणूरं हतवान्, मुष्टिकं च बलरामः हतवान् ।
**6.**दामोदरः प्रासादे स्थितं कंसं शिरसि निगृह्य पातयित्वा च अमारयत्।
**7.**परसवर्णः तु वर्गीयपंचमाक्षरस्य नियमः ।
**8.**अव्ययीभावः पूर्वपदप्रधानः द्वन्द्वः उभयपदप्रधान, द्विगुः च पूर्वपदसंख्याप्रधानः भवति ।
**9.**शतृ शानच्प्रत्ययौ वर्तमानकालिककृत्प्रत्ययौ ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**
- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात्।
- अध्यायस्य समनार्थी पद्य सूक्तयः अपि जानीयात्।

**स्व मूल्याङ्कनम् कुरुत**
- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत।
- श्री कृष्णस्य विषये अन्य श्लोक,कथा, नाटकानां वा अन्वेषणं कृत्वा अर्थं लिखत।